नैत्यिकं विधिमाचरेत् । पचनाग्निं समुज्ज्वाल्य वैश्वदेवं समाचरेत् । निष्पावान् कोद्रवान् माषान् कलायांश्चनकांस्त्यजेत् । तैलपक्वं च पक्वान्नं सर्व्वं लवणयुक् त्यजेत् । आढ़कांश्च मसूरांश्च वर्त्तुलान् वर्व्वटीस्तथा । भुक्तशेषं पर्य्युषितं वैश्वदेवे विवर्ज्जयेत् । दर्भपाणिः समाचम्य प्राणायामं विधाय च । पुष्पोदेवेति मन्त्रेण पर्य्युक्षणमथाचरेत् । प्रदक्षिणञ्च पर्य्युक्ष्य त्रिः परिस्तीर्य्य वै कुशान् । एषोहदेवमन्त्रेण वह्निं कुर्य्यात् सुसंमुखम् । वैश्वानरं समभ्यर्च्य वाज्य पुष्पाक्षतैरथ । भूराद्याश्चाहुतीस्तिस्रः स्वाहान्ताः प्रणवादिकाः । ओँ भूर्भुवः स्वः स्वाहेति विप्रोदद्यात्तथाहुतिम् । तथा देवकृतस्याद्याजुहुयाच्च षड़ाहुतीः । यमाय तूष्णीमेकाञ्च तथा स्विष्टकृते द्वयम् । विश्वेभ्यश्चापि देवेभ्योभूमौ दद्यात्ततो बलीन् । सर्व्वेभ्यश्चापि भूतेभ्योनमोदद्यात्तदुत्तरे । तद्दक्षिणे पितृभ्यश्च प्राचीनावीतिकोददेत् । निर्णेजनोदकार्थं चैशान्यां वै यक्ष्माणार्च्चयेत् । ततो ब्रह्मादिदेवेभ्यो नमोदद्यात्तदुत्तरे । निवीती सनकादिभ्यः पितृभ्यस्त्वपसव्यवान् । हन्त षोड़शभिर्ग्रासैश्चतुर्भिः पुष्कलं स्मृतम् । ग्रासमात्रा भवेद्भिक्षा गृहस्थसुकृतप्रदा । अध्वगः क्षीणवृत्तिश्च विद्यार्थी गुरुपोषकः । यतिश्च ब्रह्मचारी च षड़ेते धर्म्मभिक्षुकाः । अतिथिः पान्थकोज्ञेयोऽनूचानः श्रुतिपारगः । मान्यावेतौ गृहस्थानां ब्रह्मलोकमभीप्सताम् । अपि श्वपाके शुनि वा नैवान्नं निष्फलं भवेत् । अन्नार्थिनि समायाते पात्रापात्रं न चिन्तयेत् । शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम् । काकानाञ्च कृमीणाञ्च बहिरन्नं किरेद्भुवि । “ऐन्द्रावरुणवायव्याः सौम्या वै नैर्ऋतास्च ये । प्रतिगृह्णन्त्विमं पिण्डं काका भूमौ मयार्पितम् । द्वौश्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ । देवा मनुष्याःपशवो रक्षोयक्षोरगाः खगाः । दैत्याः सिद्धाः पिशाचाश्च प्रेताभूताश्च दानवाः । तृणानि तरवश्चापि मद्दत्तेनाभिलाषुकाः । कृमिकीटपतङ्गाद्याः कर्म्मबन्धा बुभुक्षिताः । तृप्त्यर्थमन्नं हि मया दत्तं तेषां मुदेऽस्तु वै” । इत्थं भूतबलिं दत्त्वा कालं गोदोहमात्रकम् । प्रतीक्ष्यातिथिमायान्तं विशेद्भोज्यगृहं ततः । अदत्त्वा वायसबलिं नित्यश्राद्धं समाचरेत् । नित्यश्राद्धेषु सामर्थ्यात्त्रीन् द्वावेकमथापि वा । भोजयेत् पितृयज्ञार्थं दद्यादुद्धृत्य दुर्बलः । नित्यश्राद्धं देवहीनं नियमादि विवर्ज्जितम् । दक्षिणारहितञ्चैतत् दातृभोक्तृव्रतोज्झितम् । पितृयज्ञं विधायेत्थं स्वच्छबुद्धिरनातुरः । अदुष्टासनमध्यास्य भुञ्जीत शिशुभिः सह । सुगन्धिः सुमनाः स्रग्वी शुचिवासोद्वयान्वितः । प्रागास्य उदगास्योवाभुञ्जीत पितृसेवितम् । विधायाचमनन्तद्वदुपरिष्टादधस्तथा । आपोशानविधानेन कृत्वाऽश्नीयात् सुधीर्द्विजः । प्रदद्याद्भुवःपतये भुवनपतये तथा । भूतानां पतये स्वाहेत्युक्त्वा भूमौ बलित्रयम् । सकृच्चाप उपस्पृश्य प्राणाद्याहुतिपञ्चकम् । दद्याज्जठरकुण्डाग्नौ दर्भपाणिः प्रसन्नधीः । दर्भपाणिस्तु योभुङ्क्ते तस्य दोषो न बाधते । केशकीटादिसंभूतं तदश्नीयात् सदर्भकः । यावत्तदन्नमश्नीयान्न ब्रूयात्तद्गुणागुणान् । भुञ्जते पितरस्तावद्यावन्नोक्ता गुणागुणाः । अतोमौनेन योभुङ्क्ते स भुङ्क्ते केवलामृतम् । अनुपीय ततः क्षीरं भक्ष्यं पानीयमेव वा । अमृतापिधानमसीत्येवं प्राश्योदकं सकृत् । पीतशेषं क्षिपेद्भूमौ तोयं मन्त्रमिमं पठन् । सुप्रक्षालितहस्तस्य दक्षिणाङ्गुष्ठमूलतः । “रौरवेऽपुण्यनिलये पद्मार्बुदनिवासिनाम् । उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम्” । पुनराचम्य मेधावी शुचिर्भूत्वा प्रयत्नतः । हस्तेनोदकमादाय मन्त्रमेतदुदीरयेत् । “अङ्गुष्ठमात्रः पुरुषस्त्वङ्गुष्ठञ्च समाश्रितः । ईशः सर्व्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्” । इत्यर्थं परिसंकल्प्य प्रक्षाल्य चरणौकरौ । ततोऽन्नपरिपाकार्थं मन्त्रानेतानुदीरयेत् । “अग्निराप्याययेद्धातून् पार्थिवान् पवनेरितः । दत्तावकाशोनभसा जरयत्वस्तु मे सुखम् । प्राणापानसमानानामुदानव्यानयोस्तथा । अन्नं पुष्टिकरं चास्तु मयाभ्यव्याहृतं सुखम् । समुद्रोवड़वाग्निश्च ब्रह्मोब्रह्मस्य नन्दनः । मयाऽभ्यवहृतं यत्तदशेषं जरयन्त्विमे” । मुखशुद्धिं ततः कृत्वा पुराणश्रवणादिभिः । अतिवाह्य दिवाशेषं ततः सन्ध्यां समाचरेत् । गृहे गोष्ठे नदीतीरे सन्ध्या दशगुणा क्रमात् । संभेदे स्याच्छतगुणा ह्यनन्ता शिवसन्निधौ । उपासिता बहिः सन्ध्या दिवामैथुनपातकम् । शमयेदनृतोक्ताघं मद्यगन्धजमेव च । पश्चिमास्योजपेत्तावद्यावन्नक्षत्रदर्शनम् । अतिथिं सायमायान्तमपि वा भूतृणोदकैः । सम्भाव्य परिकल्प्येत्थं निशः प्राक् प्रहरं सुधीः । इत्थं दिवा कर्म्म कृत्वा श्रुतेः पठनपाठनैः । एककाष्ठमयीं शय्यां नातितृप्तोऽथ संविशेत् । उद्देशतः समाख्यात एष नित्यतनोविधिः । इत्थं समाचरन् विप्रोनावसीदति कर्हिचित्” । इत्थं नित्यधर्म्माचरणमुक्त्वा गृहस्थवर्ज्यावर्ज्यविशेषस्तत्रैवोक्तः